International Journal of Sanskrit Research 2022; 8(1): 61-63

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 61-63
© 2022 IJSR
www.anantaajournal.com
Received: 17-10-2021
Accepted: 02-12-2021

**दीपङ्कर-सरदारः**
शोधच्छात्रः, कलिकाता विश्वविद्यालयस्य, पश्चिम बंगाल, भारत

**Corresponding Author:**
**दीपङ्कर-सरदारः**
शोधच्छात्रः, कलिकाता विश्वविद्यालयस्य, पश्चिम बंगाल, भारत

# ऋग्वेदे पुरूरवा-उर्वशीसंवादसूक्तस्य काव्यसौन्दर्यविचारः

**दीपङ्कर-सरदारः**

**प्रस्तावना**

संस्कृतसाहित्यस्य तथा भारतीयसाहित्यस्य आलोचनासमये सर्वादौ वैदिक-साहित्यस्यालोचनं कर्तव्यम्। रामायणरचनायाः पूर्ववर्तिनि काले वेदसम्बद्धं रचितं सर्वं साहित्यं 'वैदिकसाहित्यम्' इत्युच्यते। न केवलं भारतवर्षे अपि तु समग्रेऽस्यां पृथिव्यां सर्वप्राचीनः 'वेदः'। विद ज्ञाने इति धातोर्घञि प्रत्यये कृते निष्पन्नः वेदशब्दः, यस्यार्थः धर्मः ब्रह्मज्ञानञ्च। ऐतरेयब्राह्मणभाष्ये सायणाचार्यैरुक्तम् - 'इष्टप्राप्त्यनिष्ट-परिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः' [1]। ऋग्वेदभाष्यभूमिकायां - 'मन्त्रब्राह्मणात्मकशब्दराशिर्वेदः' [2] इत्येवमपि सायणैरुक्तम्। महर्षिपराशरस्तु आह - 'न कश्चिद् वेद कर्ताऽस्ति' [3]। 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' [4] इति आपस्तम्बमहर्षेः उक्तिरियम्। एवञ्च आचार्ययाज्ञवल्क्यैः कृतं प्रमाणमपि तत्रैवोक्तं –

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता।।" [5]

अर्थात् यत् प्रत्यक्षानुमानादिप्रमाणैः वेत्तुं न शक्यते, तत्तु केवलं वेदपाठज्ञानेनैव विज्ञातुं शक्यते। अतएव वेदस्य वेदत्वम्। आचार्यमनुरुक्तिरियं - 'वेदोऽखिलधर्ममूलम्' [6]। अर्थात् सर्वधर्ममूलमेव वेदः। महर्षिः कृष्णद्वैपायनव्यासदेवः ऋग्यजुस्सामाथर्वरूपेण वेदमन्त्रान् चतुर्धा विभाजनं कृतवान्। चतुर्षु वेदेषु ऋग्वेदः सर्वप्राचीनतमोऽस्ति, यस्य सूक्तसंख्या आहत्य १०२८। ऋग्वेदे मुख्यतया धर्म-कर्मफल-यज्ञ-यज्ञफल-परलोकतन्त्र-ब्रह्म-मोक्षादीनां प्रभृतिविषयाणामालोचनं कृतमस्ति। ऋग्वेदस्थाः अधिकाधिकमन्त्रा देवतास्तुतिपरकाः सन्ति। यथा – इन्द्रदेवाय -२५०, अग्नये – २००, सोमाय – १५०, अश्विनीभ्याम् – ५०, उषा – २०, वरुणः – २०, बृहस्पतिः – ११, सविता- ११, विष्णुः – ५, रुद्रः – ३ एतत्संख्यकैः सूक्तैः यथाक्रममेताः देवताः स्तुताः सन्ति। अनेनावगम्यते यत् ऋग्वेदो मुख्यतया धर्ममूलमेवास्ति, अतो देवताविषयिणी भावनैव प्रधानभूता। तत्सत्त्वेऽपि तत्रैवमपि कानिचन सूक्तानि वर्तन्ते, येषां धर्मैः साकं प्रत्यक्षता कोऽपि संयोगो नास्ति। तानि सूक्तानि धर्मनिरपेक्षसूक्तानि लौकिकसूक्तानि वेति कथ्यन्ते (Secular Hymns)। एतादृशेषु सूक्तेषु नीतिमूलकम् (अक्षसूक्तम् – १०/३४), इन्द्रजालमूलक-दानस्तुतिस्वरूपसूक्तं (१०/११७), सृष्टिविषयकं (पुरुषसूक्तम्) विवाहविषयकसूक्तं (विवाहसूक्तम् – १०/८५) च संवादसूक्ताख्यानि सूक्तानि वर्तन्ते। अस्माकमालोच्यात्मको विषयः संवादसूक्तं निम्ने आलोच्यते।

समग्रे ऋग्वेदे बहूनि सूक्तानि उपलभ्यन्ते तेषु कानिचन सूक्तानि परस्परसंलापस्वरूपेण विद्यन्ते, तानि संवादसूक्तानि संलापसूक्तरूपेण परिचितानि सन्ति। एतादृशानां संवादसूक्तानां समग्रविषयो द्वयोः ततोऽधिकयोः वा जनयोः कथोपकथनस्वरूपेण विद्यन्ते। ऋग्वेदे एतादृशानां प्रायः २० सूक्तानि उपलभ्यन्ते। यथा - 'मरुद्गण-इन्द्रसंवादः (१/१/६५), 'इन्द्र-अगस्त्यसंवादः' (१/१७०), 'लोपामुद्रा-अगस्त्यसंवादः' (१/१७९), 'विश्वामित्रनदीसंवादः' (३/३/३), 'इन्द्र-अदितिसंवादः' (४/१८), 'वरुणत्रसदस्युसंवादः' (४/४२), 'वशिष्ठ-पुत्रगणसंवादः' (७/३३), 'नेमभार्गव-इन्द्रसंवादः' (८/११०), 'यमयमीसंवादः' (१०/१०), 'इन्द्र-वसुक्रसंवादः' (१०/२७), 'इन्द्र-वसुक्र-वसुक्रपत्नी-संवादः' (१०/२८), 'अग्नि-देवतासंवादः' (१०/५२, (१०/५२, १०/५२, १०/५३), 'इन्द्र-इन्द्राणी-वृषाकपिसंवादः' (१०/८३), 'पुरूरवा-उर्वशीसंवादः' (१०/९५), 'सरमापणिसंवादः' (१०/१०८), 'यमनचिकेतासंवादः' (१०/१३५) इत्याख्यकानि सूक्तानि एतादृशेषु सूक्तेषु प्रमुखानि सन्ति।

---

1 ऐतरेयब्राह्मणम्, सायणभाष्यभूमिका, पृ. - १

2 ऋग्वेदभाष्यभूमिका, पृ. - ६

3 पराशरसंहिता – १/२०

4 आपस्तम्ब.य.पु.सू. – १/३४

5 ऐतरेयब्राह्मणम्, सायणभाष्यभूमिका, पृ. - १

6 मनुसंहिता – २/६

ऋग्वेदस्य दशममण्डलस्थितं ९५-तमं सूक्तमस्ति पुरूरवा-उर्वशी-संवादसूक्तमिति। इदं सूक्तं संवादसूक्तेषु सर्वापेक्षया प्रमुखं वर्तते। येन मन्त्रेण यः उक्तः भवति स तस्य मन्त्रस्य ऋषिरिति उच्यते। अस्मिन् सूक्ते ऋषिः यथाक्रमं पुरूरवा उर्वशी च। यः यमुद्दिश्य कथयति सा देवता। अत्र पुरूरवा उर्वशी च देवता। अत्र त्रिष्टुप् छन्दः विद्यते। तथा सूक्तेऽस्मिन् आहत्य १८ मन्त्राः सन्ति। आलोच्ये सूक्ते मर्तवासिना राज्ञा पुरूरवेण सह स्वर्गवासिनः अप्सरस उर्वश्याः कथोपकथनं वर्णितमस्ति। तौ दीर्घवर्षचतुष्टयं यावत् जीवनं यापयामासुः। तदनन्तरं पुनः उर्वशी स्वस्थानं स्वर्गं प्रत्यागच्छत्। तदा पुरूरवा उर्वशीम् अन्विषन्नेव कंश्चित् सरोवरं समुपस्थित्य गच्छन्तीम् उर्वशीं दृष्ट्वा ताम् उर्वशीम् अवरोद्धुम् उक्तवान् यत् –

"हये जाये मनसा तिष्ठे घोरे, वचांसि मिश्रा कृणवावहै नु।
न नौ मन्त्रा अनुदितास एते, मयस्करन् परतरे चनाहन्।।"[7]

अर्थात् तिष्ठ जाया! तव कीदृशः कठोरः गहनश्च मनोभावः। आगच्छ आवयोः कञ्चन वार्तालापं कुर्वः शृणुवश्च। यदि उभभ्याम् उभयोः वार्ता यदि न श्रूयते तर्हि भाविनि काले आवयोरेव हानिः स्यात्। किन्तु एतच्छ्रुत्वा उर्वशी प्रत्युत्तरितं यत् – त्वया साकं वार्तालापं कृत्वा मल्लाभो नास्ति। अहम् उषावत् परान्तरं गमिष्यामि। अहं वायुसमाना, अहं केनापि नावरुध्ये, तत्तु दुःसाध्यमेव –

"किमेता वाचा कृषवा तवाहं, प्राक्रमिषमुषसामग्रियेव।
पुरूरवः पुनरस्तं परेहि, दुरापना वात इवाहमस्मि।।"[8]

अतः उर्वशीं प्रत्यावर्तनार्थम् उर्वशीं विविधेनोपायेन अनुनयं कुर्वन् आसीत्। एवञ्च उर्वश्याः गर्भस्थसन्तानस्य प्रसङ्गमपि उत्थाप्य पुरूरवा उर्वशीं प्रत्यावर्तनाय प्रचेष्टां कृतवान्-

"कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रुः वर्तयद्विजानन्।
को दम्पती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत्।।"[9]

तथापि उर्वशी नावरुद्धा सती बहुविधमुक्त्वा प्रत्यावर्तिता। तदनन्तरं पुरूरवा दृढप्रतिज्ञाबद्धः अभवत् यत् यदि उर्वशी मां (पुरूरवां) परित्यज्यान्यत्र गच्छति तर्हि अहम् आत्महननं करिष्यामीति।

"सुदेवो अद्य प्रपतेदनावृत्, परावतं परमां गन्तवा उ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभभासो अद्युः।।"[10]

अस्य प्रत्युत्तरे उर्वशी उक्तवती यत् त्वं (पुरूरवा) मा मृत्युं काङ्क्ष, मा निर्गल। त्वमेव सर्वेषामाश्रयः। अन्तिमे उर्वशी पुरूरवाम् आश्वसयामास यत् त्वं मृत्युञ्जयी भूत्वा स्वर्गे मया (उर्वश्या) साकं मिलितो भविष्यसि –

"इति त्वा देवा इम आहुरैळ, यथेमेतद्भवसि मृत्युबन्धः।
प्रजा ते देवान् हविषा यजाति, स्वर्ग उ त्वमपि मादयासे।।"[11]

आचार्यविश्वनाथेन स्वस्य 'साहित्यदर्पणम्' इत्याख्यात्मके काव्ये लक्षणप्रसङ्गे उक्तं यत् - 'वाक्यं रसात्मकं काव्यम्' [12] अर्थात् रसात्मकं वाक्यमेव काव्यमिति। पुरूरवा-उर्वशीसूक्ते पुरूरवायाः उक्तिः –

"इषुर्न श्रिय इषुधेरसना
गोषाः शतसा न रंहिः.
अवीरे क्रतौ वि दविद्युतन्नोरा
न मायुं चित्यन्त धुनयः।।"[13]

अर्थात् हे उर्वशी, अहं (पुरूरवा) तव प्रेरणया एतावत् सन्तप्तोऽहं यत् अहं बाणनिक्षेपेण असमर्थो भवामि। दुर्बला तपःशक्तिः पुनः मयि न प्रज्ज्वलति। एवं प्रकारेण अनेन श्लोकेन उर्वशीं प्रति पुरूरवायाः गाढप्रेम्णः भावः प्रस्फुटितो भवति। अतोऽत्र शृङ्गाररस एव लक्ष्यते। परन्तु अस्मिन् आख्याने विप्रलम्भ-सम्भोगयोः उभयोः शृङ्गाररसयोः लक्ष्यमपि क्रियते।
आचार्यविश्वनाथः स्वकृतस्य साहित्यदर्पणग्रन्थस्य तृतीयपरिच्छेदे शृङ्गाररसस्य लक्षणमुक्तं यत् –

"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसशृङ्गार इष्यते।।" [14]

पिङ्गलाचार्येण स्वविरचिते पिङ्गलछन्दसूत्रे त्रिष्टुप्छन्दसः लक्षणप्रसङ्गे उल्लिखितं यत् यस्य छन्दसः चतुर्षु पादेष यथाक्रमं ११ (११+११+११+११ = ४४) आहत्य ४४ अक्षराणि सन्ति तत् त्रिष्टुप्छन्दः भवेदिति। यथा –

"यदासु मर्तो अमृतासु निस्पृक् ११
सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते। ११
ता आतयो न तन्वः शुम्भत स्वा, ११
अश्वासो न क्रीळयो दन्दशानाः।।"[15] ११

अर्थात् मन्त्रेऽस्मिन् चतुर्षु पादेषु यथाक्रमं ११ इतिसंख्यकं कृत्वा ११+११+११+११ आहत्य ४४ अक्षराणि सन्ति। अतएवात्र त्रिष्टुप्छन्दः विद्यते।
आलोच्यमानस्य सूक्तस्य द्वितीयमन्त्रे उर्वश्या उक्तिः –

"किमेता वाचा कृणुवा तवाहं
प्राक्रमिषमुषसामग्रियेव।
पुरुरवः पुनरस्तं परेहि
दुरापना वात इवाहमस्मि।।" [16]

अर्थात् अत्र मया (उर्वश्या) सह उषावाय्वोः तुलना कृतास्ति। सुतरामत्र उपमालंकारः अत्र कृतः।
यस्मिन् छन्दसि द्वयोः विजातीयपदार्थयोः सादृश्यं तथा विरुद्धधर्माणां साम्यमपि नास्ति, तदा उपमालंकारः स्यात्। विश्वनाथेन स्वकृते साहित्यदर्पणे उक्तं यत् - **'साम्यं** वाच्यमवैधर्म्यं वाक्यैक उपमा द्वयोः' [17]। मम्मटाचार्यस्तस्य काव्यप्रकाशग्रन्थे उल्लिखितवान् - 'साधर्म्यमुपमा भेदे'[18]।
आचार्यदण्डिना स्वकृतस्य काव्यादर्शग्रन्थस्य प्रथमे परिच्छेदे 'माधुर्यम्' इत्याख्यात्मकस्य गुणस्य लक्षणप्रसङ्गे उक्तवान् यत् - 'मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः' [19]**।** अर्थात् कस्यामपि रचनायां तथा विषयवस्तुन्यपि रसो विद्यते चेत् तां रचनां मधुरगुणयुक्ता रचना माधुर्यगुणयुक्ता रचना वा उच्यते। आलोच्यमानेऽस्मिन् सूक्ते शृङ्गार-करुणरसयोः प्रक्षोभः विद्यते। अतः अत्र माधुर्यगुणस्योल्लेखनं कृतमस्ति।

[7] ऋग्वेदसंहिता – १०/९५/१
[8] ऋग्वेदसंहिता – १०/९५/२
[9] ऋग्वेदसंहिता – १०/९५/१२
[10] ऋग्वेदसंहिता – १०/९५/१४
[11] ऋग्वेदसंहिता – १०/९५/१८
[12] साहित्यदर्पणम् – १/३
[13] ऋग्वेदसंहिता – १०/९५/३
[14] साहित्यदर्पणम् – ३/८३
[15] ऋग्वेदसंहिता – १०/९५/९
[16] ऋग्वेदसंहिता – १०/९५/२
[17] साहित्यदर्पणः – १०/१४
[18] काव्यप्रकाशः, दशमोल्लासः
[19] काव्यादर्शः – १/५१

काव्यालंकारस्तथा सूत्रवृत्तिकारः आचार्यवामनः रीत्या त्रिधा विभाजनं कृतमस्ति - 'सा त्रेधा वैदर्भी गौडीया पाञ्चाली चेति' [20]। वामनस्तु वैदर्भ्या लक्षणं कृतं यत् - 'समग्रगुणोपेता वैदर्भी' [21]। अर्थात् समग्रैः ओजःप्रसादप्रभृतिभिर्गुणैः उपेता वैदर्भी नाम रीतिः। उक्तेऽस्मिन् आख्याने माधुर्यगुणत्वात् अत्रावश्यमेव वैदर्भीरीत्याः प्रयोगः अस्ति, वैदर्भीरीत्यामेव सर्वेषां प्रयोगत्वात्।

उपरोक्तालोचनाया इदं स्पष्टं यत् ऋग्वेदस्य संवादसूक्तानि संख्यायां न्यूनत्वेऽपि गुरुत्वदृष्ट्या कियदंशेऽपि नगण्यं नास्ति। अत आलोच्येऽस्मिन् सूक्ते शृङ्गार-करुणरसयोः सुन्दरतया प्रयोगत्वात्, अलंकारस्य माधुर्यत्वात्, छन्दसः चातुर्यत्वात्, काव्यगुणरीतयोः सुष्ठु प्रयोगात् आलोच्यमानमिदं सूक्तं काव्यगुणेन तथा काव्यसौन्दर्येण परिपूर्णमस्ति। पाश्चात्यपण्डितेन Oldenberg-महोदयेन मन्यते यत् एतेषु संवादसूक्तेषु महाकाव्य-नाट्यसाहित्यं बहुसादृश्यं परिलक्ष्यते। जर्मन्पण्डितः Max Muller, फ्रान्सपण्डितः Sylvan Levi इत्यादयो मान्या अपि एवं मन्यन्ते यत् इमानि संवादसूक्तानि नाटकस्य लक्षणाक्रान्तानि सन्ति। Winternitz इत्येतेषां मते संवादसूक्तानि महाकाव्यनाटकानाम् उत्सस्थलानि इति। तस्मात् तेनोक्तं - ''The Ancient balled poetry is the source both of epic and of the drama for these ballads consist of a narrative and of a dramatic element.''[22]। यथा – महाकवेः कालिदासस्य 'विक्रमोर्वशीयम्' इति नाटकस्य उत्सम् ऋग्वेदस्येदं सूक्तम्। एतद्विहायापि 'हरिवंशः', 'विष्णुपुराणम्', 'कथासरित्सागरः' इत्यादिषु विषयेषु इदम् आख्यानं वर्णितमस्ति।

**सहायकग्रन्थसूची।।**


1. अधिकारी, तारकनाथः. *वैदिक संकलन*. कलिकाता : संस्कृत वुक् डिपो, २०२०
2. दण्डी. *काव्यादर्शः* (मालिन्यप्रोञ्छनीटीकायुतः). सम्पा. चिन्मयीचट्टोपाध्यायः.
3. भट्टाचार्यः, सीतानाथसमाध्यायी. *पिङ्गलच्छन्दःसूत्रम्*. सम्पा. अमरकुमारचट्टोपाध्यायः. कलिकाता : संस्कृत पुस्तक भाण्डार, २००१
4. मण्डलः, कृष्णकलिः. *वैदिक साहित्य चर्चा*. कलिकाता : संस्कृत पुस्तक भाण्डार, २०१७
5. मम्मटः. *काव्यप्रकाशः*. सम्पा. पञ्चाननतर्करत्नः. नवभारत पाब्लिशार्स, १३८९ (बङ्गाब्दः)।
6. वसुः, योगिराजः. *वेदेर परिचय*. कलिकाता : १९५७ (प्रथमसंस्करणम्)
7. वन्द्योपाध्यायः. शान्तिः. *वैदिक साहित्येर रूपरेखा*. कलिकाता : संस्कत पुस्तक भाण्डार, १९९३
8. वामनः. *काव्यालंकारसूत्रवृत्तिः* (कामधेनुटीकायुता). श्रीवाणीविलाशप्रकाशनी, १९०९
9. विश्वनाथकविराजः. *साहित्यदर्पणम्*. सम्पा. हरिदाससिद्धान्तवागीशः. कलिकाता : संस्कृत वुक् डिपो.
10. Winternitz. A History of Indian Literature. University of Calcutta, 1959, 1.


[20] काव्यालंकारसूत्रवृत्तिः, प्रथमाधिकरणम्, द्वितीयोऽध्यायः, सूत्रसंख्या - ९

[21] काव्यालंकारसूत्रवृत्तिः, प्रथमाधिकरणम्, द्वितीयोऽध्यायः, सूत्रसंख्या - ११

[22] History of Indian Literature (Vol -I), Winternitz, Page - 90